# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा - शास्त्रिद्वितीयवर्षम्** (SEM-3) | **प्रश्नपत्रम् – ५** (C.C.-2.3.5.Old) | **गुणाः - ७०** |
| **विषयः - रामानुजवेदान्तः** | | |
| **दिनाङ्कः - ८/१२/२०१८** | संदर्भग्रन्थः श्रीमद्भगवद्गीता-रामानुजभाष्यसहिता | **समयः -२.०० तः५ .००** |

**प्रथमान्वितिः**

**प्रश्नः १ द्वयोः श्लोकयोः व्याख्यानं कुरुत** **( १० )**

(१) भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान्कुरूनिति ॥

(२) गाण्डीवं स्रंसते हस्तत्त्वक् चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।

(३) अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥

**प्रश्नः २ एक एव साध्यः ।** **( १० )**

(१) स्वजनान् दृष्ट्वा अर्जुनस्य का स्थितिः अभवत् ? यथाग्रन्थम् उपवर्णयत ।

(२) श्रीभगवद्गीतायाः अवतरणहेतुं विमर्शयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अन्यतरयोः पद्ययोः व्याख्यानं कुरुत ।** **( १० )**

(१) न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्व वयमतः परम् ॥

(२) त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥

(३) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥

**प्रश्नः ४ अन्यतमः साधनीयः ।** **( १० )**

(१) श्रीमद्भगवद्गीतानुगुणं साङ्ख्ययोगं समर्थयत ।

(२) 'मुक्तसङ्गः समाचर' इत्यस्य भावं स्पष्टयत ।

## तृतीयान्वितिः

**प्रश्नः ५ द्वयोः ससन्दर्भं व्याख्यानं कुरुत ।** **( १० )**

(१) धूमेनाव्रियते वह्निर्यथादर्शोना मलेन च ।

यथोल्वेनावृतो गर्भस्तथा तेनेदमावृत्तम् ॥

(२) प्रकृतेगुणसम्मूढा सज्जन्ते गुणकर्मसु ।

तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ।

(३) नियतं कुरु कर्म त्वं ज्यायो ह्यकर्मणः ।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥

**प्रश्नः ६ एकस्यैव व्याख्यानं कुरुत ।** **( १० )**

(१) श्रीकृष्णवचोऽनुगुणं कर्मयोगं स्पष्टयत ।

(२) स्वधर्माचरणमेव श्रेयस्करम् इतीमं भावं यथाग्रन्थमुपपादयत ।

## चतुर्थान्वितिः

**प्रश्नः ७ दशानाम् एकवाक्येन उत्तरं लिखत ।** **( १० )**

(१) तृतीयाध्याये अर्जुनं प्रति श्रीकृष्णः किमुपदिशति ?

(२) स्वधर्मे किं निहितम् ?

(३) तृतीयाध्ययास्य नाम किम् ?

(४) कर्म किमर्थं कर्तव्यम् ?

(५) कीदृशं कर्म कर्तव्यम् ?

(६) श्रीकृष्णः अर्जुनस्य किं मोहयति ?

(७) विशिष्टाद्वैतवेदान्तस्य प्रवर्तकः कः ?

(८) श्रीमद्भगवद्गीतायां कति श्लोकाः ?

(९) द्वितीयाध्याये कि निरूपितम् ?

(१०) कः अवध्यः ?

(११) शस्त्राणि किं न छिन्दन्ति ?

(१२) कस्य मृत्युः ध्रुवम् ?

(१३) कः वध्यः ?

(१४) कीदृशी बुद्धिः समाधौ न विधीयते ?

(१५) श्रीमद्भगवद्गीतायां कति अध्याया ?

--००--